International Journal of Sanskrit Research 2021; 7(2): 13-15

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(2): 13-15
© 2021 IJSR
www.anantaajournal.com
Received: 12-01-2021
Accepted: 14-02-2021

**कमलिनी पण्डा**
अध्यापिका, संस्कृतविभाग: मेघासन् महाविद्यालय:, नुदडिहा, मयूरभंजम्, ओडिशा, भारत

**Corresponding Author:**
**कमलिनी पण्डा**
अध्यापिका, संस्कृतविभाग: मेघासन् महाविद्यालय:, नुदडिहा, मयूरभंजम्, ओडिशा, भारत

# अर्थशास्त्र – मनुस्मृत्यो: दण्डव्यवस्थाया: तुलनात्मकं अध्ययनम्

**कमलिनी पण्डा**

**कौटिलस्य परिचय:**

संस्कृतसाहित्यराजधर्मप्रतिपादकेषु ग्रन्थेषु बहुना नामानि उद्धरणानि तेषु अर्थशास्त्रं प्रधान एवासीत् । अयं एव ग्रन्थ: कौटिल्येन प्रणित:। अर्थशास्त्रं एकं राजनीति परक: ग्रन्थ:। इदानीन्तनै: पारभाषितम् अर्थशास्त्रं भारतीयपरिभाषायां वार्ताशास्त्रम् इति विधीयते । कृषि – पशुपाल्ये वाणिज्ये च वार्ता धान्यपशुहिरण्यकुप्य इति स्वयं कौटिल्येन लक्षितम् । राजसंस्थाया: व्यवहारपथप्रदर्शक वार्ताशास्त्रम् इति नितराम् आदरणीयं भवति ।

**मनो: परिचय:**

स्मृतिकारेषु मनु: प्रमुख: स्मृतिकारोऽस्ति । मनु: इति वेवसतमनु: इति उच्यते । तथा च वृद्धमनु: नाम्ना इति आसीत् । महाभारते मनु: श्राद्धदेवरूपेण स्वीकृत: । स्मृतिसाहित्ये सर्वप्राचीना स्मृति; मनुस्मृति भवति । मनुस्मृति काल: विषये केचन वदन्ति मनु: समय: विवादस्पदोऽस्ति । पि. वि. काणे महोदयानां मतं मनु: ख्री. द्वितीयशतकत: ख्रीष्टात्परं प्रथमशतकमध्ये स्वीक्रियते । मनुस्मृतौ १२ अध्याया: सन्ति । मनुस्मृते २६९४ श्लोका: अस्ति । मनुस्मृते ९ टीका: प्रसिद्धा: सन्ति । १. मेधातिथिभट्टस्य मनुभाष्यम् २. गोविन्दराजस्य टीका ३. सर्वज्ञनारायणस्य मन्वर्थविवृति: ४. कुल्लूकभट्टस्य मन्वर्थमुक्तावली ५. राघवानन्दस्य मन्वर्थचन्द्रिका ६. न्नन्दनाचार्यस्य मनुव्याख्यानम् ७. वमचन्द्रस्य मनुभावार्थचन्द्रिका ८. भारुचे: टीका ९. मणिरामदीक्षितस्य सुखबोधिनीटीका च । एवं च असहाय-उदयकर-भागुरि-धरणीधर-माधवाचार्य-श्रीधरस्वामि-रुचिदत्त-विश्वरूपादय; टीकाकारा: सन्ति । मनुस्मृतौ मानवस्यजीवनोपयोगिन: प्राय: सर्वेऽपि विषया: प्रतिपादिता: अस्ति ।

**अर्थशास्त्रस्य वैशिष्ट्यम्**

सर्वशास्त्राण्युपक्रम्य प्रयोगमुपलभ्य च ।
कौटिल्येन न रेन्द्रर्थे शासनस्य विधि: कृत: ।।
(अर्थशास्त्रम् पृ.०३)

न खलु इदं वार्त्ताशास्त्रं राजतन्त्रात् भिद्यते अपि तु अति सन्निकृष्टतया एव तेन सह संवध्यते। कौटिल्येन अयं सारगर्भ: सन्दर्भ: राहो चन्द्रगुप्तस्य राज्यशासनस्य निर्वहणविधिप्रदर्शनार्थम् एव महत्वम् ।
प्रायश: अयं महापुरूष: २२४० वर्षपूर्वए भारतदेशं स्वजन्मना अलंवृम्वान् इति । धर्मम्, अर्थम्, कामं च शास्त्रमिदं साधयति अधर्मत अनर्थं विद्वेषं च निहन्ति तत् एवविधं साकल्यं शास्त्रमिदं विशादयन्ति इति अत्र निदर्शनम् आचार्य: कौटिल्येन।

येन शास्त्रं च शास्त्रं च नन्दराजगता च भू: ।
अमार्षेणो द्धतान्याशु तेन शास्त्रमिदं कृतम् ।।
(अर्थशास्त्रम् पृ. ४४)

तच्च इदं कौटिल्यम् अर्थशास्त्रं राजनीतिसन्दर्भेषु प्रधानभावं भजते एतच्छास्त्रं पंचदशधिककरणै: गुम्फितम् । तत्र प्रथमधिकरणे विनयाधिकार: द्वितीये अध्यक्षप्रचार: तृतीये धर्मसंस्थापनादिकम्, चतुर्थे कण्टकशोधनम्, पंचमे योगवृत्तम्, षष्ठे मण्डलयोनि:,

सप्तमे षाड्गुण्यम्, अष्टमे व्यसनाधिकारिकः, नवमे अभियास्यत्कर्म, दशमे संग्रामिकम्, एकादशे संघवृतम्, द्वादशे आवलीयसम्, त्रयोदशे दुर्गालम्भोपायाः शास्त्रम् अर्थशास्त्रम् इति ।

राजधर्मः कोषरक्षणं शासनप्रबन्धार्थं राज्ञा नियुक्ताः अध्यक्षाः विभिन्नेषु विभागेषु इत्यादयः विषया अस्मिन् ग्रन्थे सुष्ठुतया वर्णिताः । अस्य शास्त्रस्य फृश्रुतिम् आख्यापयन् कौटिल्यपाद-

एवं शास्त्रमिदं युक्तमेताभिस्तन्त्रयुक्तिभिः ।
अवाप्तौ पालने चोक्तां लोकस्यास्य परस्य च ।।
धर्ममर्थं च काम च प्रवर्तयति पाति च ।
अर्धर्मानर्थ विद्वेषानिदं शास्त्रं निहन्वि च ।।
(अर्थशास्त्रम् पृ. ९८)

**मनुस्मृतिः वैशिष्ट्यम्**

सर्वे मानवाः कर्मानुसारेण विविधेषु योनिषु सुखदुःखानि प्राप्ताः भवन्ति । पूर्वजम्ननः कर्मानुसारेण शुभाशुभकर्मं भाग्य इति कथ्यते । श्रुतिशास्त्र भवति तस्य उत्तरम् । कारणं अस्माकं मनसि प्रश्नः समुदेति किं कर्म ? श्रुतिस्मृतिविहितं कर्म धर्मस्तद्विपरीतमधर्मः । तदानन्तरं मनुः ब्रह्मणोपदिष्टः धर्मतत्त्वं पुनः संक्षिप्तीकरणं कृत्वा साररूपेण मारीच्यादि मुनीन् उपदेशः दत्तम् ।

इदं शास्त्रं तु कृत्वाऽसौ नामेव स्वयमादितः ।
विधिव्ग्राह्यामास मरीच्यादीं स्व्वहं मुनीन् ।।
(म.स्मृ. पृ./३३)

मनुनां धर्मस्य अपरानाम वेद इति कथ्यते । धर्म शब्दः यज्ञ-धारण-पालन-धार्मिकविधि-धार्मिकगुण-अध्ययन-दान-तपः-स्वाधाय-नियमाचरण-मानवाधिकार-कर्तव्य-नियम-आचारविध्यादिषु अर्थेषु वेदोपनिषदादिषु दृश्यते। अयं धर्मः कर्तुरभिमतफलवर्षणान्मन्वादिभिः वृष इति उच्यते । यथा- वृषो हि भगवान् धर्मः । (मनुः ८/१)

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ।।
(म.स्मृ. पृ/४४)

वेदस्य अर्थानुसारेण मनुस्मृतिः रचितत्वात् तस्य प्रधान्यता अस्ति । यथा-

मनुस्मृतिविरुद्धा या सा स्मृतिर्न प्रशस्यते ।
वेदार्थोपनिबद्धत्वात् प्रधान्यम् हि मनो स्मृतेः ।।
(म.स्मृ.पृ/५५)

**अर्थशास्त्र - मनुस्मृत्यो दण्डव्यवस्थायाः तुलनाम्**

शुल्कशालायाः ध्वजास्य अधः वणिजः एकत्रीभूत्वा स्वस्य पण्यपदार्थाणां मूल्यं परिमाणं कृत्वा उच्युः अस्य पण्यपदार्थस्य परिमाणं पंचाशद् रूप्यकाणि क्रेष्यति इदृशप्रकारेण त्रिवारम् उन्नेषणात्परं ये ग्रहकाः आग्रहप्रकाशं करिष्यन्ति तान् दध्युः अनेन यदि ग्राहकेषु मध्ये उपस्थितः भवेत् तर्हि पंचपदार्थाणां मूल्यवृद्धिः भविष्यति । येन निर्धारितमूल्यात् अधिकतरं शुल्कं राजकोशं गमिष्यति । पुनश्च ये वणिजः शुल्कं दातुं पण्यपदार्थाणां परिमाणं स्वल्पं कृत्वा उच्युः तज्जदि राजा जानाति तर्हि सः वणिजान् समुदितमूल्यस्य रूप्यकाणि दत्त्वा अवशिष्टानि रूप्यकाणि तस्य कोशं नेष्यति अथवा उवत पदार्थस्योपरि निर्धारितः शुल्कस्य अष्टगुणाः शुल्कः दण्डाकारेण नेष्यति । पुनश्च यदि काचित् वणिजः शुल्कं दातुं तर्हि सुवर्णरौप्यकाणि आदि पदार्थान् सारभाण्डस्य अन्ते लीयेरन् । तद् यदि राजा जानाति तर्हि उवतपदार्थस्योपरि निर्धारितः शुल्कस्य अष्टः गुणाः शुल्काः दण्डाकारेण नेष्यति । पुनश्च यदि शुल्काध्यक्षः वणिग्भ्यः करग्रहणं कृत्वा अथवा प्रीतिदृष्ट्या व्यवसायी वणिजां दोषं लीयते तर्हि राजा शुल्काध्यक्षात् तेषां वणिजां पण्यपदार्थस्योपरि निर्धारितः शुल्कस्य अष्टगुणशुल्काः नेष्यति । काचित् वणिक् यदि शुल्कं न दत्त्वा शुल्काध्यक्षस्य ध्वजम् अतिक्रामति तर्हि तस्मात् राजा तस्य पण्यपदार्थस्योपरि निर्धारितः शुल्कस्य अष्टगुणशुल्कः नेष्यति । एतान् धर्त्तुं शुल्काध्यक्षः कृषिमवेशधारी पशुपालान् तथा च वणिजः नियोजितं कुर्यात् । यदि काचित् व्यक्तिः स्वस्य पुत्रः पत्नी माता पितरौ नाबालकभ्राता भगिनी एवं च दुहिता एषां भरणपोषणं न कुर्यात् तर्हि राजा तस्मात् द्वादसपनः दन्डः आनयेत् । एब्यः यदि काचित् व्यक्तिः पतिता भूत्वा गृहात् वर्हिः गच्छेत् तर्हि गृहस्वामी तस्य भरनपोषणं न करिष्यति । परन्तु यदि माता पतिता भवेत् तर्हि पुत्रः तस्य पालनपोषणं न करिष्यति। पुनश्च यः व्यक्तिः पुत्रपत्न्योः पालनपोषन व्यवस्था न कृत्वा संन्यासग्रहणपूर्वकं गृहत्यागं कृत्वा गच्छेत् तर्हि तेभ्यः राजा दण्डाकारेण पंचारादधिकद्विशतरूप्यकाणि नेष्यति । तादृसं यः व्यक्तिः स्त्रीः संन्यासिनी भवितुं वदेत् तर्हि राजा तेभ्यः पूर्वोक्तविध्यनुसारेण रूप्यकाणि नेष्यति । पुनश्च यदि मनुष्यस्य मैतुनशक्तिः नष्टः भवेत् तदा सः राजकीयधर्माचार्यस्य अनुमितिः नीत्वा स्वस्य संपदं सन्तानमध्येषु यथोचितभावेन विभागीकरणं करिष्यति तत्परं संन्यासग्रहणं करिष्यति । यदि काचित् व्यक्तिः उक्तनियमम् उल्लंघयेत् तर्हि राजा तं कारादण्डेन दण्डितः करिष्यति । पुनश्च राजा कृषिबहुलग्रामेषु प्रमोदोद्यानं च प्रेक्षालयः निर्माणं न करिष्यति । नर्तन- गायन-वादन-वाग्जीवन-कुशीलवाः एते यादृशं कृषकस्य कार्ये विघ्नं न कुर्यात् तादृशं व्यवस्था राजा करिष्यति । यदि ग्रामेषु नाटकः एवं च विभिन्नमंचकार्याणां व्यवस्था भवेत् तर्हि जनाः स्वजीविकानिर्वाहं न कृत्वा नूनं विलासव्यवनेषु मग्नः भविष्यति । अतः कौटिल्यः श्लोकः लिखति –

परचक्राटवीग्रस्तं व्याधिदुर्भिक्षपीडितम् ।
देशं परिहरेद्राजा व्ययक्रीडाश्च वारयेत् ।।
(अ.शा.पृ/४५)

अर्थात् राजा शत्रृणाम् आक्रमणात् पुनश्च आटविकानाम् आक्रमणात् स्वदेशं रक्षा कुर्यात् एवं च महामारी-वसन्तादि व्याधयः तथा च दुर्भिक्षादि अवस्थायाः स्वदेशं राजा परिहरेत् । पुनश्च राजा व्ययक्रीडा राज्यात् परित्यजेत् येन धनस्य अपव्ययः भविष्यति एवं च जनेषु विलासस्य वृद्धिः भविष्यति । पुनश्च कौटिल्येन लिखितम्–

दण्डविष्टिकरावाधैः रक्षेदुपहतां कृषिम् ।
स्तेनव्यालविषग्राहैर्व्याधिभिश्च पशुव्रजान् ।।
(अ.शा.पृ/७६)

पुनश्च राजा दण्ड-विष्टि-कर-एभिः बाधैः कृषिक्षेत्रं रक्षां कुर्यात् । पुनश्च स्तेनः व्याघ्रादिहिंस्त्रजन्तवः विषधरसर्पाः एवं च व्याधयः एषां आक्रमणात् कृषकाणां गृहपालितान् पशून् रक्षां कर्त्तुं तत्परः भविष्यति ।

**मनुस्मृतौ दण्डस्य स्वरूपं एवं दण्डप्रणयनम्** –

संस्कृतवांगमये भूयांशः स्मृतिग्रन्थाः सन्ति, तेषु मनुस्मृतेः महत्वं प्रमाण्यं च शताब्दी शताब्दी यावत् स्वीकृतम् । तैत्तिरीयसंहितायाम् उक्तम् –

यद्वै किं च मनुरवदत् तद्भेषजम् ।
मनुवै यत् किंचावदत् तत् भैषज्यायै ।।
(त.री.सं. पृ/७७)

स्मृतिग्रन्थेषु आचार:, व्यवहार:, प्रायश्चित्त: इति त्रयाणां विषयाणां प्राधान्यम् उपस्थाप्यते । मनुस्मृतौ धर्मार्थकामोक्ष: चतुर्विधपुरुषार्थस्य विवेचनम् अस्ति । यद्यपि मनुस्मृतौ सप्तमाध्याये राज्ञ: उप्तति: प्रथमत: मनु: कथयति, परन्तु दण्डव्यवस्थाया: विषये स: विस्तृतभावेन वर्णयति ।

अस्मिन् धर्मोऽखिलो न्येकतो गुणदोषौ च कर्मणाम् ।
चतुर्णामपि वर्णानाम् आचारस्यैव शाश्वतम् ।।
(म. स्मृ. पृ/४१)

**दण्डस्य सृष्टि:**

राज्ञ: प्रयोजनसिद्धये प्राक् ईश्वर: सर्वप्राणीनां रक्षितार: धर्मस्वरूपं पुत्र: तथा च ब्रह्मतेजोमय: पंचभौतिकं दण्डं सृष्टवान् । यथा -:

तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वर: ।।
(म.स्मृ. ७/१४)

**दण्डविधानम्**

राज्ञ: दण्डस्य भयेन चराचरा: सर्वे प्राणिन: भाग कर्त्तुं समर्था: भवन्ति । ते स्वस्वधर्मेभ्य: विचलिता: न भवन्ति अर्थात् एते प्राणिन: राजनियमात् भ्रष्टा: न भवन्ति । अन्यथा वलवतादुर्बलस्य धनदारादिग्रहणे तस्यापि तदपेक्षय वलिनेति कस्यापि भोगो न सिध्येत् । राजा दण्डप्रयोगसमये देश: काल: औचित्यं ज्ञानं एवं च वास्तविकता एतान् विचार्य ये मानवा: कन्यायमार्गे पदार्पणं कुर्वन्ति तान् शास्त्रानुसारेण दण्डं दद्यात् । यथा-:

तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वत: ।
यर्थार्हत: संप्रणयेन्तरेष्वन्यायवर्तितषु ।।
(म.स्मृ.७/१६)

**दण्डस्य प्रशंसा**

स एव दण्डो वस्तुतो राजा वारणयत् तस्मिन् सति राजशक्तियोगात्, पुनश्च स एव दण्ड: पुरुष: अस्ति कारणं यत् सर्वे जना: इमं दण्डं प्राप्तुं योग्या: सन्ति अत: स्त्रीसदृशं अयं दण्ड: पुरुष: अयं दण्ड: नेता कारणं यत् दण्डेन सर्वाणि कार्याणि यथाविध्यानुसारेण प्राप्तो भवति, पुनश्च स: शासका: कारणं यत् तस्य आज्ञया सर्वे प्रजा: स्वस्वकर्मक्षेत्रेषु तत्परा: भवन्ति । पुनश्च स: दण्ड: चतुर्णामपि आश्रमाणां यो धर्मस्तस्य संपादने प्रतिभूरिव प्रतिभू: इति मुनिभि: स्मृत: । यथा -:

स राजा पुरुषो दण्ड: स नेता शासिता च स: ।
चतुर्णामाश्रमाणां च धर्मस्य प्रतिभू: स्मृत: ।।
(म.स्म.७/१७)

**दण्डस्य कार्यम्**

स: दण्ड: सर्वा: प्रजा: शास्ति, पुनश्च स: सर्वा: प्रजा: एव अभिरक्षति निद्राणेष्वपि रक्षितृषु दण्ड: एव जागर्ति, तद्भयेनैव चौरा: राज्यं न प्रविष्टवन्त: । दण्ड एव धर्महेतुत्वात् विद्वांस: तं धर्म इति विदन्ति । यथा-:

दण्ड: शास्ति प्रजा: सर्वा दण्ड एवाभिरक्षति ।
दण्ड: सुप्तेषु जागर्ति दण्डं धर्म विदुर्बुधा: ।।
(म.स्मृ.७/१८)

शास्त्रानुसारं विचारपूर्वकं प्रणीत: दण्ड: सर्वे प्रजानां रंजयति, परन्तु शास्त्रानुसारेण प्रणीत: न भवन् दण्ड: यदि प्रयोग: भवेत् तर्हि स: सर्वाभ्य: दिग्भ्य: नष्टस्य कारणं भवेत् ।

**दण्डस्य आवश्यकता**

यदि राजाऽनलया भूत्वा दण्डप्रणयनं न कुर्यात् तदा शूले कृत्वा मत्स्यानिव वलवन्त: प्राणिन: दुर्बलान् प्राणिन् अक्षयन् शूले मत्स्यानिवापक्षयन् इत्येष: न्याय: मेधातिथि – गोविन्दराजलिखित: पाठे अस्ति । यथा -;

यदि न प्रणयेत् राजा दण्डं दण्डयेष्वतन्द्रित: ।
शूले मत्स्यानिवापक्ष्यन्दुर्बलवत्तरा: ।।
(म.स्म. ७/१९)

यदि राजा दण्डं न प्रणयेत् तदा यज्ञेषु सर्वथा हविरनर्ह: काक: पुरोडाशं अखादिष्यत् तथा च कुक्कुर: पायसादि हवि: अलेक्षयत् । न कस्यचित् कुत्रचित् साम्यं अभविष्यत् । नीचजना: उच्चासनं स्वाधिकारं कुर्यु: । सर्वे जना: दण्डेनैव नियमित: सन्मार्गेऽवतिष्ठते । कारणं यत् स्वभावविरुद्धो हि मनुष्य: कष्टेन लभ्यते । दण्डभयेन सर्वे जना: स्वस्य भोग्यपदार्थान् व्यवहार – कर्त्तुं समर्था: भवन्ति । अत: कथ्यते –

सर्वे दण्डजितो लोको दुर्लभो हि शुचिर्नर: ।
दण्डस्य हि भयात्सर्वं जगद् भयाद् कल्पते ।।
(म.स्मृ. ७/२१)

**उपसंहार:**

भारतीयप्राचीनसंस्कृतसाहित्येतिहासे यै: उपादेयग्रन्थानि प्राप्यन्ते तन्मध्यात् कौटिलस्य अर्थशास्त्रं प्रसिद्धग्रन्थभावेन परिगणित: भवति । कौटिल्येन तस्या दण्डव्यवस्थाया: शुल्कशालाया: ध्वजास्य अध: वणिज: एकत्रीभूत्वा स्वस्य पण्यपदार्थाणां मूल्यं परिमाणं च उद्घोषितं कृत्वा उच्यु: अस्य पण्यपदार्थस्य परिमाणं पंचाशद् रूप्यकाणि क: क्रेष्यति इदृशप्रकारेण वर्णयति। मनुस्मृते राजा दण्डं समुचितानुसारेण प्रयोगं कुर्यात् तर्हि तस्य धमार्थकामत्रिवर्गस्य समृद्धि: भवेत् परन्तु यदि कामक्रोधादि षड्रिपुभि: वशीभूता: भूत्वा स: नियमानुसारेण प्रयोगं न कुर्यात् तर्हि दण्डेन तस्य विनाश: भवेत् ।

तं राजा प्रणयन्सम्यक् त्रिवर्गेणाभिवर्धते ।
कामात्मा विषम: क्षुद्रो दण्डेनैव निहन्यते ।।
(म.स्म. ७/२६)

**सहायक ग्रन्थ सूची**

१. मनुसमृति:, पाढी प्रमोदकुमार, किताबमहल, कटक, प्रथमसंस्करणम्, २०१८
२. मनुस्मृति:, शतपथि सत्यजित्, साम्बिदि प्रकाशन्, पुरी, प्रथमसंस्करणम्, २०१२
३. अर्थशास्त्रं, दाश करुणाकर, कल्याणि पब्लिकेशन्, कटक, प्रथमसंस्करणम्, २०१७
४. अर्थशास्त्रं, शुक्ला रमाकान्त, चौखम्बा, तिरुपति, पंचमसंस्करणम्, २०१५